# Shri Dadhivamana Stotram

# શ્રીદધિવામનસ્તોત્રમ્

## Document Information

Text title : Shri Dadhivamana Stotram 03 09

File name : dadhivAmanastotram.itx

Category : vishhnu, stotra

Location : doc_vishhnu

Proofread by : Rajesh Thyagarajan

Description/comments : Vamanapurana. From stotrArNavaH 03-09

Latest update : August 14, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 14, 2021

*sanskritdocuments.org*

# શ્રીદધિવામનસ્તોત્રમ્

હેમાદ્રિશિખરાકારં શુદ્ધસ્ફટિકસન્નિભમ્ ।
પૂર્ણચન્દ્ર નિભં દેવં દ્વિભુજં વામનં સ્મરેત્ ॥ ૧॥

પદ્માસનસ્થં દેવેશં ચન્દ્રમણ્ડલમધ્યગમ્ ।
જ્વલત્કોટિતટિત્પ્રખ્યં તટિત્કોટિસમપ્રભમ્ ॥ ૨॥

સૂર્યકોટિપ્રતીકાશં ચન્દ્રકોટિસુશીતલમ્ ।
ચન્દ્રમણ્ડલમધ્યસ્થં વિષ્ણુમવ્યયમચ્યુતમ્ ॥ ૩॥

શ્રીવત્સકૌસ્તુભોરસ્કં દિવ્યરત્નવિભૂષિતમ્ ।
પીતામ્બરમુદારાઙ્ગં વનમાલાવિભૂષિતમ્ ॥ ૪॥

સુન્દરં પુણ્ડરીકાક્ષં કિરીટેન વિરાજિતમ્ ।
ષોડશસ્ત્રીવૃતં સમ્યગપ્સરોગણસેવિતમ્ ॥ ૫॥

ઋગ્યજુસ્સામાથર્વાદ્યૈર્ગીયમાન જનાર્દનમ્ ।
ચતુર્મુખાદિદેવેશૈર્ગીયમાનં મુદા સદા ॥ ૬॥

દધિમિશ્રાન્નકબલં રુક્મપાત્રં ચ દક્ષિણે ।
કરે તુ ચિન્તયેદ્ ધ્યાયેત્પીયૂષમમૃતં સુધીઃ ॥ ૭॥

સાધકાનાં પ્રયચ્છન્તમન્નપાનમનુત્તમમ્ ।
બ્રાહ્મે મુહૂર્ત ઉત્થાય ધ્યાયેદ્ધ્યેયમધોક્ષજમ્ ॥ ૮॥

અત્રપુમલગાત્રં રુક્મપાત્રસ્થમન્નં
    સકલશદધિરવણ્ડં પણિના દક્ષિણેન ।
કલશમમૃતપૂર્ણં વામહસ્તે દધાનં
    તરતિ સકલદુઃખાદ્વા (ખં વા) મનં ભાવયેદ્યઃ ॥ ૯॥

અન્નદાતા ભવેદન્નં અન્નમન્નાદ એવ ચ ।
ક્ષીરમન્નં ઘૃતં ચૈવ આયુરારોગ્યમેવ ચ ॥ ૧૦॥

પુરસ્તાદનમાપ્નવ્યં પુનરાવૃત્તિવર્જિતમ્ ।
આયુરારોગ્યમૈશ્વર્યં લભતે ચાન્નસમ્પદમ્ ॥ ૧૧॥

એવં સ્તોત્રં પઠેદ્યસ્તુ પ્રાતઃ કાલે દ્વિજોત્તમઃ ।
અક્લેશાદન્નસિદ્ધ્યર્થં જ્ઞાનસિદ્ધ્યર્થમેવ ચ ॥ ૧૨॥

ઇતિ શ્રીવામનપુરાણે શ્રીદધિવામનસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Rajesh Thyagarajan

*Shri Dadhivamana Stotram*

pdf was typeset on August 14, 2021

Please send corrections to *sanskrit@cheerful.com*